## ४९तमम् अखिल-भारतीय-प्राच्यविद्या-सम्मेलनम् (49th Session of AIOC)

भारतीयसंस्कृतेः संस्कृतस्य च संरक्षणाय प्राच्यविद्याः महत्त्वपूर्णं स्थानं भजन्ते। वेदवेदाङ्गवैदिकगणिताऽऽयुर्वेदयोगविज्ञानव्याकरणदर्शनसाहित्यपुराणेतिहासादिविषया ज्ञान-विज्ञानस्य स्रोतांसि वर्तन्ते। एतेषां शास्त्राणां संरक्षणाय नवीनगवेषणायै च प्रत्येकं वर्षद्वयान्तराले अखिलभारतीयप्राच्यविद्यासम्मेलनस्य आयोजनं क्रियते। इह भवति समागमो नैकेषां वेदवेदाङ्गोपनिषत्पुराणेतिहासधर्मशास्त्रदर्शनमीमांसाकाव्याऽऽयुर्वेदसङ्गणकराजनीतिशास्त्र-भौतिकरसायनजीवविज्ञानवनस्पतिशास्त्रपुरातत्त्वऽरबीपर्शियनगुर्जरभाषासाहित्यविषयविशारदानां समीक्षकाणां शोधार्थिनां तत्तच्छास्त्रपारङ्गतानां विदुषाम्। इमे हि विद्वांसः प्राच्यविद्यायाः नैकविषयेषु नवीनगवेषणां प्रस्तुत्य पारम्परिकज्ञानविज्ञानस्य आधुनिकयुगानुकूलव्याख्यां विधाय विद्वत्समवायं तोषयन्ति। गुजरातराज्ये अष्टादशवर्षानन्तरम् एतादृशस्य अतिविशिष्टस्य सम्मेलनस्य ४९तमस्य सत्रस्य आयोजनं श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १८, १९, २० मई २०१८ इति दिनाङ्केषु विश्वविद्यालयपरिसरे कृतमासीत्। अस्मिन् सम्मेलने वेद-वेदाङ्ग-साहित्य-अलङ्कार-दर्शन-पुराणेतिहास-अरबी-पर्शियन-गुर्जरसाहित्यादिविषयेषु ७०० अधिकानि तत्तच्छास्त्रनिष्णातैः चितानि शोधपत्राणि पठितानि। सम्मेलनस्यास्य संयोजकरूपेण स्थानीय-सचिवः प्रो. देवेन्द्रनाथपाण्डेयः, अतिरिक्तसचिवः डॉ. जानकीशरण आचार्यश्च आस्ताम्।

अस्य सम्मेलनस्य उद्घाटनकार्यक्रमः १८.०५.२०१८ तमे दिनाङ्के पूर्वाह्णे १० वादने प्रावर्तत। अस्मिन् उद्घाटनकार्यक्रमे उद्घाटकरूपेण गुजरातराज्यस्य मुख्यमन्त्रिचरः श्रीकेशुभाई पटेलवर्यः, मुख्यातिथिरूपेण गुजरातराज्यस्य शिक्षणमन्त्री श्रीभूपेन्द्रसिंह चूडासमावर्यः, अध्यक्षरूपेण कुलपतिचरः प्रो. अर्कनाथचौधरीवर्यः, विशिष्टातिथिरूपेण डॉ. पङ्कज जानीवर्यः, सम्मेलनाध्यक्षरूपेण प्रो. चन्द्रकान्त शुक्लः, सम्मेलनमहासचिवरूपेण प्रो. सरोजाभाटेमहोदया अन्ये च महानुभावाः उपस्थिताः सन्तः कार्यक्रमं व्यभूषयन्। स्थानीयसचिवः प्रो. देवेन्द्रनाथ-पाण्डेयः स्वागतभाषणं विधाय अखिलभारतीयप्राच्यविद्यासम्मेलनस्य प्रास्ताविकमपठत्। अस्मिन् सम्मेलने केचन विशिष्टाः कार्यक्रमाः अपि आयोजिताः आसन्। सांस्कृतिककार्यक्रमेषु १८.०५.२०१८ दिनाङ्के सायं प्रसिद्धशास्त्रीयनृत्याङ्गना डॉ. नलिनी जोषी भरतनाट्यं प्रास्तौत्। श्रीवीणापाणिसमूहद्वारा 'षोडशसंस्कारः' इत्याख्यं लोकप्रसिद्धं नाटकं प्रस्तूतं यच्च सर्वैः भृश प्रशंसितम्। १९.०५.२०१८ तमे दिनाङ्के सारङ्गपुरस्थ-स्वामिनारायणसंस्कृतमहाविद्यालयच्छात्रैः अपि 'वीर शिवाजी' इत्याख्यं नाटकं प्रस्तुतम्।

अस्य सम्मेलनस्य एकम् एतदपि वैशिष्ट्यम् आसीत् यत् अत्र भारतस्य प्रसिद्धाः विद्वांसः १९.०५.२०१८ तमे दिनाङ्के आयोजितायां पण्डितपरिषदि भागं गृहीत्वा वाक्यार्थम् अकुर्वन्। प्रो. रामचन्द्रझा, प्रो. रामकुमार शर्मा, प्रो. ब्रजभूषण ओझा, प्रो. विष्णपद महापात्रः, डॉ. अमृतलाल भोगायता, डॉ. वाचस्पतिमिश्र इत्यादिमनीषिणः व्याकरण-दर्शन-साहित्यादिविषयेषु यथासिद्धान्तं शास्त्रार्थविचारं प्रास्तुवन्। राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिः प्रो. परमेश्वरनारायण-शास्त्री अस्याः पण्डितपरिषदः अध्यक्षपदं व्यभूषयत्। अखिलभारतीयप्राच्यविद्यासम्मेलनाङ्गतया एकं कविसम्मेलनमपि आयोजितम्। 'पद्मश्री' रमाकान्तशुक्लवर्यस्य आध्यक्षे आयोजिते अस्मिन् कविसम्मेलने डॉ. राजेन्द्रत्रिपाठी 'रसराजः', डॉ. गौतमपटेलः, हर्षदेवमाधवः, प्रो. सरोजा भाटे प्रभृतयः कवयः स्वकाव्यकौशलेन उपस्थितश्रोतृगणम् अतूतुषन्।

अस्य समापनसमारोहः २०.०५.२०१८ दिनाङ्के पूर्वाह्णे समायोजितः। अत्र आशीर्वादप्रदातृरूपेण पूज्याः रमेशभाई ओझा वर्याः, मुख्यातिरूपेण सोमनाथ-न्यासस्य सचिवः श्री पी. के. लहरीवर्यः, विशेषातिथिरूपेण वेरावल-पाटणसंयुक्तनगरपालिका-प्रमुखः श्री जगदीश फोफण्डीवर्यः, रेयोन-उद्योगप्रमुखः श्री हरेन्द्रसिंह डांगरवर्यः, प्रो. अर्कनाथ चौधरी, प्रो. चन्द्रकान्तशुक्लः प्रो. सरोजा भाटे, प्रो. देवेन्द्रनाथ पाण्डेयः इत्यादिमहानुभावाः उपस्थिताः आसन्। अस्य सम्मेलनस्य अतिरिक्तस्थानीयसचिवेन डॉ. जानकीशरण आचार्येण अभ्यागतानां स्वागतं विधाय समग्रकार्यक्रमस्य सञ्चालनमकारि। प्रो. सरोजाभाटेवर्या विभिन्नसत्रेषु पुरस्काराय चितानां सर्वोत्तमशोधवाचकानां नामानि अघोषयत्। पूज्यभागवताचार्याः रमेशभाई-ओझावर्याः स्वीयया गीर्वाणगिरा आशीर्वादप्रदानेन सर्वान् उपस्थितान् अतोषयन्। सम्मेलनस्यास्य समापनम् अतिरिक्तस्थानीयसचिवस्य डॉ. जानकीशरण आचार्यस्य धन्यवादज्ञापनेन अभवत्।



४९तमम् अखिलभारतीयप्राच्यविद्यासम्मेलनम् उद्घाटयन्तः अतिथयः


सम्मेलने समुपस्थिताः प्रथिताः विद्वांसः कवयः मनीषिणश्च



[illegible] प्रवृत्तस्य कविसम्मेलनस्य किञ्चन दृश्यम्


पण्डितपरिषदि वाक्यार्थप्रस्तुत्यर्थम् उपस्थिताः विद्वांसः


समापनसमारोहे मञ्चासीनाः श्रीरमेशभाई ओझावर्याः अन्ये च महानुभावाः

Scanned with CamScanner